# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ४** | |
| विषयः - साहित्यम् ( नाट्यवर्गः ) | (C.C.-5.3.9.(4) Old & New ) | गुणाः - ७० |
| दिनाङ्कः - ०७/१२/२०१८ | *ग्रन्थः नाट्यदर्पणम् -१,२ विवेकः* | समयः -१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितयोः कारिकयोः एकस्या ससन्दर्भं व्याख्याः कार्या ।** ( ५ )

*(१) अलङ्कारमृदुः पन्थाः कथादीनां सुसञ्चरः ।*
*दुःसञ्चरस्तु नाट्यस्य रसकल्लोल सङ्कुलः ॥*

*(२) श्लेषालङ्कारभाजोऽपि रसनिस्यन्दकर्कशाः ।*
*दुर्भगाइव कामिन्यः प्रीणन्ति न मनोऽगिरः ॥*

**प्रश्नः २** *गुणचन्द्र-रामचन्द्रयोः जीवनवृतं लिखत।* ( १० )

**( अथवा )**

*ग्रन्थोक्तदिशां नाट्यतत्त्वानां विवेचनं कुरुत।*

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कारिकयोः एकस्याः ससन्दर्भं व्याख्याः कार्या ।** ( ५ )

*(१) उद्धतोदात्त - ललित - शान्ता धीरविशेषणाः ।*
*वर्ण्याः स्वभावश्चत्वारो नेतॄणां मध्यमोत्तमः ॥*

*(२) एवं प्रवेशको नीचैः परार्थैः प्राकृतादिनां ।*
*एतौ प्रभूतकार्यत्वान्नाटकादि चतुष्टये ॥*

**प्रश्नः ४** *ग्रन्थोक्तदिशा रूपकाणि लेखितव्यानि।* ( १० )

**( अथवा )**

*ग्रन्थोक्तदिशा नायकभेदान् स्पष्टयत।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कारिकयोः एकस्या ससन्दर्भं व्याख्याः कार्या ।** ( ५ )

*(१) सबीजविकृतावस्थाः नानाभावा मुखादयः ।*
*फलसंयोगिनो यस्मिन् असौ निर्वहणो ध्रुवम् ॥*

*(२) भेदनं प्रापणं मुक्तिर्विधानं परिभावना।*
*सर्वसन्धिष्वमूनि स्युः द्वादशाङ्गं मुखे ध्रुवम् ॥*

**प्रश्नः ६** *प्रतिमुखसन्ध्यङ्गानि यथाग्रन्थं प्रदर्शयत।* **( १० )**

**( अथवा )**

*गर्भसन्धिं सोदाहरणं लिखत।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितयोः कारिकयोः एकस्याः ससन्दर्भं व्याख्या कार्या । ( ५ )**

*(१) प्रकरणं वणिग्-विप्र-सचिवस्वाम्यसङ्करात्।*
*मन्दगोत्राङ्गनं दिव्यानाश्रितं मध्यक्षेष्टितम्॥*

*(२) भावः प्रधानश्रृङ्गार-वीरो-मुख-निर्वह्णान्।*
*एकाङ्को दशलास्याङ्गः प्रायो लोकानुरञ्जकः॥*

**प्रश्नः ८** *प्रकरणस्य लक्षणं विलिख्य तस्य भेदान् लिखत।* **( १० )**

**( अथवा )**

*भावस्य लक्षणं विलिख्य वृत्तिम् अपि प्रदर्शयत।*

**प्रश्नः ९ अधोलिखितेषु प्रश्नेषु दशप्रश्नानाम् लघूत्तराणि देयानि । ( १० )**

*(१) कति अर्थ प्रकृतयः ?*
*(२) आरम्भ-यत्न-प्राप्त्याशा-नियताप्ति-फलागमाः काः इमाः ?*
*(३) किं नाम परिभावना ?*
*(४) किं नाम नर्म ?*
*(५) किं नाम उपवाद ?*
*(६) किं नाम प्रशस्तिः ?*
*(७) प्रकरणस्य कति प्रकाराः ?*
*(८) प्रायः लोकानुरञ्जकं किं रूपकम् ?*
*(९) रौद्ररसप्रधानं किं रूपकम् ?*
*(१०) प्रहसनं कतिविधम् ?*
*(११) रामचन्द्र-गुणचन्द्रयोः गुरोः नाम किम् ?*
*(१२) नाट्यदर्पणस्य कर्तारौ कौ ?*
*(१३) नाट्यदर्पणे कति विवेकाः ?*
*(१४) नाट्यदर्पणस्य प्रथमविवेकस्य किं नाम ?*
*(१५) नाट्यदर्पणस्य द्वितीयविवेकस्य किं नाम ?*

--००--